# Gangasahasranamavali

# ગઙ્ગાસહસ્રનામાવલિઃ

## Document Information

Text title : gangAsahasranAmAvalI

File name : gangAsahasranAmAvalI.itx

Category : sahasranAmAvalI, devii, nadI, devI

Location : doc_devii

Transliterated by : DPD, NA

Proofread by : NA

Description-comments : akArAdikShakArAnta

Source : Skandapurana, Kashikhanda

Acknowledge-Permission: Mahaperiaval Trust

Latest update : September 11, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 22, 2022

*sanskritdocuments.org*

# ગઙ્ગાસહસ્રનામાવલિઃ

સિતમકરનિષણ્ણાં શુભ્રવર્ણાં ત્રિનેત્રાં
 કરધૃતકલશોદ્યત્સોપલાભીત્યભીષ્ટામ્ ।
વિધિહરિરૂપાં સેન્દુકોટીરજૂટાં
 કલિતસિતદુકૂલાં જાહ્નવી તાં નમામિ ॥

ૐ ઓઙ્કારરૂપિણ્યૈ નમઃ । અજરાયૈ । અતુલાયૈ । અનન્તાયૈ ।
અમૃતસ્રવાયૈ । અત્યુદારાયૈ । અભયાયૈ । અશોકાયૈ । અલકનન્દાયૈ ।
અમૃતાયૈ । અમલાયૈ । અનાથવત્સલાયૈ । અમોઘાયૈ । અપાં
યોનયે । અમૃતપ્રદાયૈ । અવ્યક્તલક્ષણાયૈ । અક્ષોભ્યાયૈ ।
અનવચ્છિન્નાયૈ । અપરાયૈ । અજિતાયૈ નમઃ । ૨૦

ૐ અનાથનાથાયૈ નમઃ । અભીષ્ટાર્થસિદ્ધિદાયૈ । અનઙ્ગવર્ધિન્યૈ ।
અણિમાદિગુણાયૈ । અધારાયૈ । અગ્રગણ્યાયૈ । અલીકહારિણ્યૈ ।
અચિન્ત્યશક્તયે । અનઘાયૈ । અદ્ભુતરૂપાયૈ । અઘહારિણ્યૈ ।
અદ્રિરાજસુતાયૈ । અષ્ટાઙ્ગયોગસિદ્ધિપ્રદાયૈ । અચ્યુતાયૈ ।
અક્ષુણ્ણશક્તયે । અસુદાયૈ । અનન્તતીર્થાયૈ । અમૃતોદકાયૈ ।
અનન્તમહિમ્ને । અપારાયૈ નમઃ । ૪૦

ૐ અનન્તસૌખ્યપ્રદાયૈ નમઃ । અન્નદાયૈ । અશેષદેવતામૂર્તયે ।
અઘોરાયૈ । અમૃતરૂપિણ્યૈ । અવિદ્યાજાલશમન્યૈ ।
અપ્રતર્ક્યગતિપ્રદાયૈ । અશેષવિઘ્નસંહર્ત્ર્યૈ ।
અશેષગુણગુમ્ફિતાયૈ । અજ્ઞાનતિમિરજ્યોતિષે । અનુગ્રહપરાયણાયૈ ।
અભિરામાયૈ । અનવદ્યાઙ્ગ્યૈ । અનન્તસારાયૈ । અકલઙ્કિન્યૈ ।
આરોગ્યદાયૈ । આનન્દવલ્લ્યૈ । આપન્નાર્તિવિનાશિન્યૈ । આશ્ચર્યમૂર્તયે ।
આયુષ્યાયૈ નમઃ । ૬૦

ૐ આઢ્યાયૈ નમઃ । આદ્યાયૈ । આપ્રાયૈ । આર્યસેવિતાયૈ । આપ્યાયિન્યૈ ।
આપ્તવિદ્યાયૈ । આખ્યાયૈ । આનન્દાયૈ । આશ્વાસદાયિન્યૈ ।

આલસ્યઘ્ન્યૈ । આપદાં હન્ત્ર્યૈ । આનન્દામૃતવર્ષિણ્યૈ ।
ઇરાવત્યૈ । ઇષ્ટદાત્ર્યૈ । ઇષ્ટાયૈ । ઇષ્ટાપૂર્તફલપ્રદાયૈ ।
ઇતિહાસશ્રુતીડ્યાર્થાયૈ । ઇહામુત્રશુભપ્રદાયૈ ।
ઇજ્યાશીલસમિજ્યેષ્ઠાયૈ । ઇન્દ્રાદિપરિવન્દિતાયૈ નમઃ । ૮૦

ૐ ઇલાલઙ્કારમાલાયૈ નમઃ । ઇદ્ધાયૈ । ઇન્દિરારમ્યમન્દિરાયૈ ।
ઇતે । ઇન્દિરાદિસંસેવ્યાયૈ । ઈશ્વર્યૈ । ઈશ્વરવલ્લભાયૈ ।
ઈતિભીતિહરાયૈ । ઈડ્યાયૈ । ઈડનીયચરિત્રભૃતે ।
ઉત્કૃષ્ટશક્તયે । ઉત્કૃષ્ટાયૈ । ઉડુપમણ્ડલચારિણ્યૈ ।
ઉદિતામ્બરમાર્ગાયૈ । ઉસ્રાયૈ । ઉરગલોકવિહારિણ્યૈ । ઉક્ષાયૈ ।
ઉર્વરાયૈ । ઉત્પલાયૈ । ઉત્કુમ્ભાયૈ નમઃ । ૧૦૦

ૐ ઉપેન્દ્રચરણદ્રવાયૈ નમઃ । ઉદન્વત્પૂર્તિહેતવે ।
ઉદારાયૈ । ઉત્સાહપ્રવર્ધિન્યૈ । ઉદ્વેગઘ્ન્યૈ । ઉષ્ણશમન્યૈ ।
ઉષ્ણરશ્મિસુતાપ્રિયાયૈ । ઉત્પત્તિસ્થિતિસંહારકારિણ્યૈ ।
ઉપરિચારિણ્યૈ । ઊર્જંવહન્ત્યિ । ઊર્જધરાયૈ । ઉર્જાવત્યૈ ।
ઉર્મિમાલિન્યૈ । ઊર્ધ્વરેતઃપ્રિયાયૈ । ઉર્ધ્વાધ્વાયૈ । ઊર્મિલાયૈ ।
ઉર્ધ્વગતિપ્રદાયૈ । ઋષિવૃન્દસ્તુતાયૈ । ઋદ્ધયે ।
ઋણત્રયવિનાશિન્યૈ નમઃ । ૧૨૦

ૐ ઋતમ્ભરાયૈ નમઃ । ઋદ્ધિદાત્ર્યૈ । ઋક્સ્વરૂપાયૈ ।
ઋજુપ્રિયાયૈ । ઋક્ષમાર્ગવહાયૈ । ઋક્ષાર્ચિષે ।
ઋજુમાર્ગપ્રદર્શિન્યૈ । એધિતાખિલધર્માર્થાયૈ ।
એકસ્યૈ । એકામૃતદાયિન્યૈ । એધનીયસ્વભાવાયૈ । એજ્યાયૈ ।
એજિતાશેષપાતકાયૈ । ઐશ્વર્યદાયૈ । ઐશ્વર્યરૂપાયૈ ।
ઐતિહ્યાયૈ । ઐન્દવદ્યુતયે । ઓજસ્વિન્યૈ । ઓષધીક્ષેત્રાયૈ ।
ઓજોદાયૈ નમઃ । ૧૪૦

ૐ ઓદનદાયિન્યૈ નમઃ । ઓષ્ઠામૃતાયૈ । ઔન્નત્યદાત્ર્યૈ ।
ભવરોગિણામૌષધાયૈ । ઔદાર્યચઞ્ચવે । ઔપેન્દ્ર્યૈ ।
ઔગ્ર્યૈ । ઔમેયરૂપિણ્યૈ । અમ્બરાધ્વવહાયૈ । અમ્બષ્ઠાયૈ ।
અમ્બરમાલાયૈ । અમ્બુજેક્ષણાયૈ । અમ્બિકાયૈ । અમ્બુમહાયોનવે ।
અન્ધોદાયૈ । અન્ધકહારિણ્યૈ । અંશુમાલાયૈ । અંશુમત્યૈ ।
અઙ્ગીકૃતષડાનનાયૈ । અન્ધતામિસ્રહન્ત્ર્યૈ નમઃ । ૧૬૦

ૐ અન્ધવે નમઃ । અઞ્જનાયૈ । અઞ્જનાવત્યૈ । કલ્યાણકારિણ્યૈ ।
કામ્યાયૈ । કમલોત્પલગન્ધિન્યૈ । કુમુદ્વત્યૈ । કમલિન્યૈ ।
કાન્ત્યૈ । કલ્પિતદાયિન્યૈ । કાઞ્ચનાક્ષ્યૈ । કામધેનવે ।
કીર્તિકૃતે । ક્લેશનાશિન્યૈ । ક્રતુશ્રેષ્ઠાયૈ । ક્રતુફલાયૈ ।
કર્મબન્ધવિભેદિન્યૈ । કમલાક્ષ્યૈ । ક્લમહરાયૈ ।
કૃશાનુતપનદ્યુતયે નમઃ । ૧૮૦

ૐ કરુણાર્દ્રાયૈ નમઃ । કલ્યાણ્યૈ । કલિકલ્મષનાશિન્યૈ ।
કામરૂપાયૈ । ક્રિયાશક્ત્યૈ । કમલોત્પલમાલિન્યૈ । કૂટસ્થાયૈ ।
કરુણાયૈ । કાન્તાયૈ । કૂર્મયાનાયૈ । કલાવત્યૈ । કમલાયૈ ।
કલ્પલતિકાયૈ । કાલ્યૈ । કલુષવૈરિણ્યૈ । કમનીયજલાયૈ ।
કમ્રાયૈ । કપર્દિસુકપર્દગાયૈ । કાલકૂટપ્રશમન્યૈ ।
કદમ્બકુસુમપ્રિયાયૈ નમઃ । ૨૦૦

ૐ કાલિન્દ્યૈ નમઃ । કેલિલલિતાયૈ । કલકલ્લોલમાલિકાયૈ ।
ક્રાન્તલોકત્રયાયૈ । કણ્ડ્વૈ । કણ્ડૂતનયવત્સલાયૈ ।
ખડ્ગિન્યૈ । ખડ્ગધારાભાયૈ । ખગાયૈ । ખણ્ડેન્દુધારિણ્યૈ ।
ખેખેલગામિન્યૈ । ખસ્થાયૈ । ખણ્ડેન્દુતિલકપ્રિયાયૈ ।
ખેચર્યૈ । ખેચરીવન્દ્યાયૈ । ખ્યાતાયૈ । ખ્યાતિપ્રદાયિન્યૈ ।
ખણ્ડિતપ્રણતાઘૌઘાયૈ । ખલબુદ્ધિવિનાશિન્યૈ । ખાતૈનઃ
કન્દસન્દોહાયૈ નમઃ । ૨૨૦

ૐ ખડ્ગખટ્વાઙ્ગ ખેટિન્યૈ નમઃ । ખરસન્તાપશમન્યૈ ।
પીયૂષપાથસાં ખનયે । ગઙ્ગાયૈ । ગન્ધવત્યૈ । ગૌર્યૈ ।
ગન્ધર્વનગરપ્રિયાયૈ । ગમ્ભીરાઙ્ગ્યૈ । ગુણમય્યૈ ।
ગતાતઙ્કાયૈ । ગતિપ્રિયાયૈ । ગણનાથામ્બિકાયૈ । ગીતાયૈ ।
ગદ્યપદ્યપરિષ્ટુતાયૈ । ગાન્ધાર્યૈ । ગર્ભશમન્યૈ ।
ગતિભ્રષ્ટગતિપ્રદાયૈ । ગોમત્યૈ । ગુહ્યવિદ્યાયૈ । ગવે નમઃ । ૨૪૦

ૐ ગોપ્ત્ર્યૈ નમઃ । ગગનગામિન્યૈ । ગોત્રપ્રવર્ધિન્યૈ । ગુણ્યાયૈ ।
ગુણાતીતાયૈ । ગુણાગ્રણ્યૈ । ગુહામ્બિકાયૈ । ગિરિસુતાયૈ ।
ગોવિન્દાઙ્ઘ્રિસમુદ્ભવાયૈ । ગુણનીયચરિત્રાયૈ । ગાયત્ર્યૈ ।
ગિરિશપ્રિયાયૈ । ગૂઢરૂપાયૈ । ગુણવત્યૈ । ગુર્વ્યૈ ।
ગૌરવવર્ધિન્યૈ । ગ્રહપીડાહરાયૈ । ગુન્દ્રાયૈ । ગરઘ્ન્યૈ ।

ગાનવત્સલાયૈ નમઃ । ૨૬૦

ॐ ઘર્મહન્ત્ર્યૈ નમઃ । ઘૃતવત્યૈ । ઘૃતતુષ્ટિપ્રદાયિન્યૈ ।
ઘણ્ટારવપ્રિયાયૈ । ઘોરાઘૌઘવિધ્વંસકારિણ્યૈ ।
ઘ્રાણતુષ્ટિકર્યૈ । ઘોષાયૈ । ઘનાનન્દાયૈ । ઘનપ્રિયાયૈ ।
ઘાતુકાયૈ । ઘૂર્ણિતજલાયૈ । ઘૃષ્ટપાતકસન્તત્યૈ ।
ઘટકોટિપ્રપીતાપાયૈ । ઘટિતાશેષમઙ્ગલાયૈ ।
ઘૃણાવત્યૈ । ઘૃણિનિધયે । ઘસ્મરાયૈ । ઘૂકનાદિન્યૈ ।
ઘુસૃણાપિઞ્જરતનવે । ઘર્ઘરાયૈ નમઃ । ૨૮૦

ॐ ઘર્ઘરસ્વનાયૈ નમઃ । ચન્દ્રિકાયૈ । ચન્દ્રકાન્તામ્બવે ।
ચઞ્ચદાપાયૈ । ચલદ્યુતયે । ચિન્મય્યૈ । ચિતિરૂપાયૈ ।
ચન્દ્રાયુતશતાનનાયૈ । ચામ્પેયલોચનાયૈ । ચારવે । ચાર્વઙ્ગ્યૈ ।
ચારુગામિન્યૈ । ચાર્યાયૈ । ચારિત્રનિલયાયૈ । ચિત્રકૃતે ।
ચિત્રરૂપિણ્યૈ । ચમ્પ્વૈ । ચન્દનશુચ્યમ્બવે । ચર્ચનીયાયૈ ।
ચિરસ્થિરાયૈ નમઃ । ૩૦૦

ॐ ચારુચમ્પકમાલાઢ્યાયૈ નમઃ । ચમિતાશેષદુષ્કૃતાયૈ ।
ચિદાકાશવહાયૈ । ચિન્ત્યાયૈ । ચઞ્ચતે । ચામરવીજિતાયૈ ।
ચોરિતાશેષવૃજિનાયૈ । ચરિતાશેષમણ્ડલાયૈ ।
છેદિતાખિલપાપૌઘાયૈ । છદ્મઘ્ન્યૈ । છલહારિણ્યૈ ।
છન્નત્રિવિષ્ટપતલાયૈ । છોટિતાશેષબન્ધનાયૈ ।
છુરિતામૃતધારૌઘાયૈ । છિન્નૈનસે । છન્દગામિન્યૈ ।
છત્રીકૃતમરાલૌઘાયૈ । છટીકૃતનિજામૃતાયૈ । જાહ્નવ્યૈ ।
જ્યાયૈ નમઃ । ૩૨૦

ॐ જગન્માત્રે નમઃ । જપ્યાયૈ । જઙ્ઘાલવીચિકાયૈ ।
જયાયૈ । જનાર્દનપ્રીતાયૈ । જુષણીયાયૈ । જગદ્ધિતાયૈ ।
જીવનાયૈ । જીવનપ્રાણાયૈ । જગતે । જ્યેષ્ઠાયૈ । જગન્મય્યૈ ।
જીવજીવાતુલતિકાયૈ । જન્મિજન્મનિબર્હિણ્યૈ । જાડ્યવિધ્વંસનકર્યૈ ।
જગદ્યોનયે । જલાવિલાયૈ । જગદાનન્દજનન્યૈ । જલજાયૈ ।
જલજેક્ષણાયૈ નમઃ । ૩૪૦

ॐ જનલોચનપીયૂષાયૈ નમઃ । જટાતટવિહારિણ્યૈ । જયન્ત્યૈ ।
જઞ્જપૂકઘ્ન્યૈ । જનિતજ્ઞાનવિગ્રહાયૈ । ઝલ્લરીવાદ્યકુશલાયૈ ।

ઝલજ્ઝાલજલાવૃતાયૈ । ઝિણ્ટીશવન્દ્યાયૈ । ઝઙ્કારકારિણ્યૈ ।
ઝર્ઝરાવત્યૈ । ટીકિતાશેષપાતાલાયૈ । એનોદ્રિપાટને
ટઙ્કિકૈયૈ । ટઙ્કારનૃત્યત્કલ્લોલાયૈ । ટીકનીયમહાતટાયૈ ।
ડમ્બરપ્રવહાયૈ । ડીનરાજહંસકુલાકુલાયૈ । ડમડ્ડમરુહસ્તાયૈ ।
ડામરોક્તમહાણ્ડકાયૈ । ઢૌકિતાશેષનિર્વાણાયૈ ।
ઢક્કાનાદચલજ્જલાયૈ નમઃ । ૩૬૦

ૐ ઢુણ્ઢિવિઘ્નેશજનન્યૈ નમઃ । ઢણઢ્ઢુણિતપાતકાયૈ ।
તર્પણ્યૈ । તીર્થતીર્થાયૈ । ત્રિપથાયૈ । ત્રિદશેશ્વર્યૈ ।
ત્રિલોકગોપ્ત્ર્યૈ । તોયેશ્યૈ । ત્રૈલોક્યપરિવન્દિતાયૈ ।
તાપત્રિતયસંહર્ત્ર્યૈ । તેજોબલવિવર્ધિન્યૈ । ત્રિલક્ષ્યાયૈ ।
તારણ્યૈ । તારાયૈ । તારાપતિકરાર્ચિતાયૈ । ત્રૈલોક્યપાવનિપુણ્યાયૈ ।
તુષ્ટિદાયૈ । તુષ્ટિરૂપિણ્યૈ । તૃષ્ણાચ્છેત્ર્યૈ । તીર્થમાત્રે નમઃ । ૩૮૦

ૐ ત્રિવિક્રમપદોદ્ભવાયૈ નમઃ । તપોમય્યૈ । તપોરૂપાયૈ ।
તપઃસ્તોમફલપ્રદાયૈ var પદપ્રદાયૈ । ત્રૈલોક્યવ્યાપિન્યૈ ।
તૃપ્ત્યૈ । તૃપ્તિકૃતે । તત્ત્વરૂપિણ્યૈ । ત્રૈલોક્યસુન્દર્યૈ ।
તુર્યાયૈ । તુર્યાતીતફલપ્રદાયૈ । ત્રૈલોક્યલક્ષ્મ્યૈ । ત્રિપદ્યૈ ।
તથ્યાયૈ । તિમિરચન્દ્રિકાયૈ । તેજોગર્ભાયૈ । તપઃસારાયૈ ।
ત્રિપુરારિશિરોગૃહાયૈ । ત્રયીસ્વરૂપિણ્યૈ । તન્વ્યૈ નમઃ । ૪૦૦

ૐ તપનાઙ્ગજભીતિનુદે નમઃ । તરયે । તરણિજામિત્રાયૈ ।
તર્પિતાશેષપૂર્વજાયૈ । તુલાવિરહિતાયૈ । તીવ્રપાપતૂલતનૂનપાતે ।
દારિદ્ર્યદમન્યૈ । દક્ષાયૈ । દુષ્પ્રેક્ષાયૈ । દિવ્યમણ્ડનાયૈ ।
દીક્ષાવત્યૈ । દુરાવાપ્યાયૈ । દ્રાક્ષામધુરવારિભૃતે ।
દર્શિતાનેકકુતુકાયૈ । દુષ્ટદુર્જયદુઃખહૃતે । દૈન્યહૃતે ।
દુરિતઘ્ન્યૈ । દાનવારિપદાબ્જજાયૈ । દન્દશૂકવિષઘ્ન્યૈ ।
દારિતાઘૌઘસન્તતાયૈ નમઃ । ૪૨૦

ૐ દ્રુતાયૈ નમઃ । દેવદ્રુમચ્છન્નાયૈ । દુર્વારાઘવિઘાતિન્યૈ ।
દમગ્રાહ્યાયૈ । દેવમાત્રે । દેવલોકપ્રદર્શિન્યૈ । દેવદેવપ્રિયાયૈ ।
દેવ્યૈ । દિક્પાલપદદાયિન્યૈ । દીર્ઘાયુષ્કારિણ્યૈ । દીર્ઘાયૈ ।
દોગ્ધ્ર્યૈ । દૂષણવર્જિતાયૈ । દુગ્ધામ્બુવાહિન્યૈ । દોહ્યાયૈ ।
દિવ્યાયૈ । દિવ્યગતિપ્રદાયૈ । દ્યુનદ્યૈ । દીનશરણાયૈ ।

દેહિદેહનિવારિણ્યૈ નમઃ । ૪૪૦

ૐ દ્રાઘીયસ્યૈ નમઃ । દાઘહન્ત્ર્યૈ । દિતપાતકસન્તત્યૈ ।
દૂરદેશાન્તરચર્યૈ । દુર્ગમાયૈ । દેવવલ્લભાયૈ ।
દુર્વૃત્તઘ્ન્યૈ । દુર્વિગાહ્યાયૈ । દયાધારાયૈ । દયાવત્યૈ ।
દુરાસદાયૈ । દાનશીલાયૈ । દ્રાવિણ્યૈ । દ્રુહિણસ્તુતાયૈ ।
દૈત્યદાનવસંશુદ્ધિકર્ત્ર્યૈ । દુર્બુદ્ધિહારિણ્યૈ । દાનસારાયૈ ।
દયાસારાયૈ । દ્યાવાભૂમિવિગાહિન્યૈ । દૃષ્ટાદૃષ્ટફલપ્રાપ્ત્યૈ નમઃ । ૪૬૦

ૐ દેવતાવૃન્દવન્દિતાયૈ નમઃ । દીર્ઘવ્રતાયૈ ।
દીર્ઘદૃષ્ટિર્દીપ્તતોયાયૈ । દુરાલભાયૈ । દણ્ડયિત્ર્યૈ ।
દણ્ડનીતયે । દુષ્ટદણ્ડધરાર્ચિતાયૈ । દુરોદરઘ્ન્યૈ ।
દાવાર્ચિષે । દ્રવતે । દ્રવ્યૈકશેવધયે । દીનસન્તાપશમન્યૈ ।
દાત્ર્યૈ । દવથુવૈરિણ્યૈ । દરીવિદારણપરાયૈ । દાન્તાયૈ ।
દાન્તજનપ્રિયાયૈ । દારિતાદ્રિતટાયૈ । દુર્ગાયૈ ।
દુર્ગારણ્યપ્રચારિણ્યૈ નમઃ । ૪૮૦

ૐ ધર્મદ્રવાયૈ નમઃ । ધર્મધુરાયૈ । ધેનવે ।
ધીરાયૈ । ધૃતયે । ધ્રુવાયૈ । ધેનુદાનફલસ્પર્શાયૈ ।
ધર્મકામાર્થમોક્ષદાયૈ । ધર્મોર્મિવાહિન્યૈ । ધુર્યાયૈ ।
ધાત્ર્યૈ । ધાત્રીવિભૂષણાય । ધર્મિણ્યૈ । ધર્મશીલાયૈ ।
ધન્વિકોટિકૃતાવનાયૈ । ધ્યાતૃપાપહરાયૈ । ધ્યેયાયૈ ।
ધાવન્યૈ । ધૂતકલ્મષાયૈ । ધર્મધારાયૈ નમઃ । ૫૦૦

ૐ ધર્મસારાયૈ નમઃ । ધનદાયૈ । ધનવર્ધિન્યૈ ।
ધર્માધર્મગુણચ્છેત્ર્યૈ । ધત્તૂરકુસુમપ્રિયાયૈ । ધર્મેશ્યૈ ।
ધર્મશાસ્ત્રજ્ઞાયૈ । ધનધાન્યસમૃદ્ધિકૃતે । ધર્મલભ્યાયૈ ।
ધર્મજલાયૈ । ધર્મપ્રસવધર્મિણ્યૈ । ધ્યાનગમ્યસ્વરૂપાયૈ ।
ધરણ્યૈ । ધાતૃપૂજિતાયૈ । ધૂરે । ધૂર્જટિજટાસંસ્થાયૈ ।
ધન્યાયૈ । ધિયે । ધારણાવત્યૈ । નન્દાયૈ નમઃ । ૫૨૦

ૐ નિર્વાણજનન્યૈ નમઃ । નન્દિન્યૈ । નુન્નપાતકાયૈ ।
નિષિદ્ધવિઘ્નનિચયાયૈ । નિજાનન્દપ્રકાશિન્યૈ ।
નભોઙ્ગણચર્યૈ । નૂતયે । નમ્યાયૈ । નારાયણ્યૈ । નુતાયૈ ।
નિર્મલાયૈ । નિર્મલાખ્યાનાયૈ । તાપસમ્પદાં નાશિન્યૈ । નિયતાયૈ ।

નિત્યસુખદાયૈ । નાનાશ્ચર્યમહાનિધયે । નદ્યૈ । નદસરોમાત્રે ।
નાયિકાયૈ । નાકદીર્ઘિકાયૈ નમઃ । ૫૪૦

ૐ નષ્ટોદ્ધરણધીરાયૈ નમઃ । નન્દનાયૈ । નન્દદાયિન્યૈ ।
નિર્ણિક્તાશેષભુવનાયૈ । નિઃસઙ્ગાયૈ । નિરુપદ્રવાયૈ ।
નિરાલમ્બાયૈ । નિષ્પ્રપઞ્ચાયૈ । નિર્ણાશિતમહામલાયૈ ।
નિર્મલજ્ઞાનજનન્યૈ । નિશ્શેષપ્રાણિતાપહૃતે । નિત્યોત્સવાયૈ ।
નિત્યતૃપ્તાયૈ । નમસ્કાર્યાયૈ । નિરઞ્જનાયૈ । નિષ્ઠાવત્યૈ ।
નિરાતઙ્કાયૈ । નિર્લેપાયૈ । નિશ્ચલાત્મિકાયૈ । નિરવદ્યાયૈ નમઃ । ૫૬૦

ૐ નિરીહાયૈ નમઃ । નીલલોહિતમૂર્ધગાયૈ ।
નન્દિભૃઙ્ગિગણસ્તુત્યાયૈ । નાગાયૈ । નન્દાયૈ । નગાત્મજાયૈ ।
નિષ્પ્રત્યૂહાયૈ । નાકનદ્યૈ । નિરયાર્ણવદીર્ઘનાવે । પુણ્યપ્રદાયૈ ।
પુણ્યગર્ભાયૈ । પુણ્યાયૈ । પુણ્યતરઙ્ગિણ્યૈ । પૃથવે ।
પૃથુફલાયૈ । પૂર્ણાયૈ । પ્રણતાર્તિપ્રભઞ્જન્યૈ । પ્રાણદાયૈ ।
પ્રાણિજનન્યૈ । પ્રાણેશ્યૈ નમઃ । ૫૮૦

ૐ પ્રાણરૂપિણ્યૈ નમઃ । પદ્માલયાયૈ । પરાયૈ । શક્ત્યૈ ।
પુરજિત્પરમપ્રિયાયૈ । પરાયૈ । પરફલપ્રાપ્ત્યૈ ।
પાવન્યૈ । પયસ્વિન્યૈ । પરાનન્દાયૈ । પ્રકૃષ્ટાર્થાયૈ ।
પ્રતિષ્ઠાયૈ । પાલિન્યૈ । પરાયૈ । પુરાણપઠિતાયૈ ।
પ્રીતાયૈ । પ્રણવાક્ષરરૂપિણ્યૈ । પાર્વત્યૈ । પ્રેમસમ્પન્નાયૈ ।
પશુપાશવિમોચન્યૈ નમઃ । ૬૦૦

ૐ પરમાત્મસ્વરૂપાયૈ નમઃ । પરબ્રહ્મપ્રકાશિન્યૈ ।
પરમાનન્દનિષ્યન્દાયૈ । પ્રાયશ્ચિત્તસ્વરૂપિણ્યૈ var
નિષ્પન્દાયૈ । પાનીયરૂપનિર્વાણાયૈ । પરિત્રાણપરાયણાયૈ ।
પાપેન્ધનદવજ્વાલાયૈ । પાપારયે । પાપનામનુદે ।
પરમૈશ્વર્યજનન્યૈ । પ્રજ્ઞાયૈ પ્રાજ્ઞાયૈ । પરાપરાયૈ ।
પ્રત્યક્ષલક્ષ્મ્યૈ । પદ્માક્ષ્યૈ । પરવ્યોમામૃતસ્રવાયૈ ।
પ્રસન્નરૂપાયૈ । પ્રણિધયે । પૂતાયૈ । પ્રત્યક્ષદેવતાયૈ ।
પિનાકિપરમપ્રીતાયૈ નમઃ । ૬૨૦

ૐ પરમેષ્ઠિકમણ્ડલવે નમઃ । પદ્મનાભપદાર્ઘ્યેણ પ્રસૂતાયૈ ।
પદ્મમાલિન્યૈ । પરર્દ્ધિદાયૈ । પુષ્ટિકર્યૈ । પથ્યાયૈ । પૂર્ત્યૈ ।

પ્રભાવત્યૈ । પુનાનાયૈ । પીતગર્ભઘ્ન્યૈ । પાપપર્વતનાશિન્યૈ ।
ફલિન્યૈ । ફલહસ્તાયૈ । ફુલ્લામ્બુજવિલોચનાયૈ ।
ફાલિતૈનોમહાક્ષેત્રાયૈ । ફણિલોકવિભૂષણાય ।
ફેનચ્છલપ્રણુન્નૈનસે । ફુલ્લકૈરવગન્ધિન્યૈ ।
ફેનિલાચ્છામ્બુધારાભાયૈ । ફડુચ્ચાટિતપાતકાયૈ નમઃ । ૬૪૦

ૐ ફાણિતસ્વાદુસલિલાયૈ નમઃ । ફાણ્ટપથ્યજલાવિલાયૈ ।
વિશ્વમાત્રે । વિશ્વેશ્યૈ । વિશ્વાયૈ । વિશ્વેશ્વરપ્રિયાયૈ ।
બ્રહ્મણ્યાયૈ । બ્રહ્મકૃતે । બ્રાહ્મ્યૈ । બ્રહ્મિષ્ઠાયૈ ।
વિમલોદકાયૈ । વિભાવર્યૈ । વિરજાયૈ । વિક્રાન્તાનેકવિષ્ટપાયૈ ।
વિશ્વમિત્રાય । વિષ્ણુપદ્યૈ । વૈષ્ણવ્યૈ । વૈષ્ણવપ્રિયાયૈ ।
વિરૂપાક્ષપ્રિયકર્ય્યૈ । વિભૂત્યૈ નમઃ । ૬૬૦

ૐ વિશ્વતોમુખ્યૈ નમઃ । વિપાશાયૈ । વૈબુધ્યૈ । વેદ્યાયૈ ।
વેદાક્ષરરસસ્રવાયૈ । વિદ્યાયૈ । વેગવત્યૈ । વન્દ્યાયૈ ।
બૃંહણ્યૈ । બ્રહ્મવાદિન્યૈ । વરદાયૈ । વિપ્રકૃષ્ટાયૈ ।
વરિષ્ઠાયૈ । વિશોધન્યૈ । વિદ્યાધર્યૈ । વિશોકાયૈ ।
વયોવૃન્દનિષેવિતાયૈ । બહૂદકાયૈ । બલવત્યૈ । વ્યોમસ્થાયૈ નમઃ । ૬૮૦

ૐ વિબુધપ્રિયાયૈ નમઃ । વાણ્યૈ । વેદવત્યૈ । વિત્તાયૈ ।
બ્રહ્મવિદ્યાતરઙ્ગિણ્યૈ । બ્રહ્માણ્ડકોટિવ્યાપ્તામ્બ્વૈ ।
બ્રહ્મહત્યાપહારિણ્યૈ । બ્રહ્મેશવિષ્ણુરૂપાયૈ । બુદ્ધ્યૈ ।
વિભવવર્ધિન્યૈ । વિલાસિસુખદાયૈ । વશ્યાયૈ । વ્યાપિન્યૈ ।
વૃષારણ્યૈ । વૃષાઙ્કમૌલિનિલયાયૈ । વિપન્નાર્તિપ્રભઞ્જિન્યૈ ।
વિનીતાયૈ । વિનતાયૈ । બ્રધ્નતનયાયૈ । વિનયાન્વિતાયૈ નમઃ । ૭૦૦

ૐ વાદ્ય (વિપઞ્ચી વાદ્ય) કુશલાયૈ નમઃ । વેણુશ્રુતિવિચક્ષણાયૈ ।
વર્ચસ્કર્યૈ । બલકર્યૈ । બલોન્મૂલિતકલ્મષાયૈ । વિપાપ્મને ।
વિગતાતઙ્કાયૈ । વિકલ્પપરિવર્જિતાયૈ । વૃષ્ટિકર્ત્ર્યૈ ।
વૃષ્ટિજલાયૈ । વિધયે । વિચ્છિન્નબન્ધનાયૈ । વ્રતરૂપાયૈ ।
વિત્તરૂપાયૈ । બહુવિઘ્નવિનાશકૃતે । વસુધારાયૈ । વસુમત્યૈ ।
વિચિત્રાઙ્ગ્યૈ । વિભાયૈ । વસવે નમઃ । ૭૨૦

ૐ વિજયાયૈ નમઃ । વિશ્વબીજાયૈ । વામદેવ્યૈ । વરપ્રદાયૈ ।
વૃષાશ્રિતાયૈ । વિષઘ્ન્યૈ । વિજ્ઞાનોર્મ્યંશુમાલિન્યૈ ।

ભવ્યાયૈ । ભોગવત્યૈ । ભદ્રાયૈ । ભવાન્યૈ । ભૂતભાવિન્યૈ ।
ભૂતધાત્ર્યૈ । ભયહરાયૈ । ભક્તદારિદ્ર્યઘાતિન્યૈ ।
ભુક્તિમુક્તિપ્રદાયૈ । ભેશ્યૈ । ભક્તસ્વર્ગાપવર્ગદાયૈ ।
ભાગીરથ્યૈ । ભાનુમત્યૈ નમઃ । ૭૪૦

ૐ ભાગ્યાયૈ નમઃ । ભોગવત્યૈ । ભૃતયે । ભવપ્રિયાયૈ ।
ભવદ્વેષ્ટ્ર્યૈ । ભૂતિદાયૈ । ભૂતિભૂષણાયૈ ।
ભાલલોચનભાવજ્ઞાયૈ । ભૂતભવ્યભવત્પ્રભ્વે ।
ભ્રાન્તિજ્ઞાનપ્રશમન્યૈ । ભિન્નબ્રહ્માણ્ડમણ્ડપાયૈ ।
ભૂરિદાયૈ । ભક્તિસુલભાયૈ । ભાગ્યવદ્દૃષ્ટિગોચર્યૈ ।
ભઞ્જિતોપપ્લવકુલાયૈ । ભક્ષ્યભોજ્યસુખપ્રદાયૈ ।
ભિક્ષણીયાયૈ । ભિક્ષુમાત્રે । ભાવાયૈ । ભાવસ્વરૂપિણ્યૈ નમઃ । ૭૬૦

ૐ મન્દાકિન્યૈ નમઃ । મહાનન્દાયૈ । માત્રે । મુક્તિતરઙ્ગિણ્યૈ ।
મહોદયાયૈ । મધુમત્યૈ । મહાપુણ્યાયૈ । મુદાકર્યૈ । મુનિસ્તુતાયૈ ।
મોહહન્ત્ર્યૈ । મહાતીર્થાયૈ । મધુસ્રવાયૈ । માધવ્યૈ । માનિન્યૈ ।
માન્યાયૈ । મનોરથપથાતિગાયૈ । મોક્ષદાયૈ । મતિદાયૈ ।
મુખ્યાયૈ । મહાભાગ્યજનાશ્રિતાયૈ નમઃ । ૭૮૦

ૐ મહાવેગવત્યૈ નમઃ । મેધ્યાયૈ । મહાયૈ । મહિમભૂષણાયૈ ।
મહાપ્રભાવાયૈ । મહત્યૈ । મીનચઞ્ચલલોચનાયૈ ।
મહાકારુણ્યસમ્પૂર્ણાયૈ । મહર્દ્ધ્યૈ । મહોત્પલાયૈ । મૂર્તિમતે ।
મુક્તિ(મૂર્તિમન્મુક્તિ) રમણ્યૈ । મણિમાણિક્યભૂષણાયૈ ।
મુક્તાકલાપનેપથ્યાયૈ । મનોનયનનન્દિન્યૈ । મહાપાતકરાશિઘ્ન્યૈ ।
મહાદેવાર્ધહારિણ્યૈ । મહોર્મિમાલિન્યૈ । મુક્તાયૈ । મહાદેવ્યૈ નમઃ । ૮૦૦

ૐ મનોન્મન્યૈ નમઃ । મહાપુણ્યોદયપ્રાપ્યાયૈ ।
માયાતિમિરચન્દ્રિકાયૈ । મહાવિદ્યાયૈ । મહામાયાયૈ ।
મહામેધાયૈ । મહૌષધાય । માલાધર્યૈ । મહોપાયાયૈ ।
મહોરગવિભૂષણાયૈ । મહામોહપ્રશમન્યૈ । મહામઙ્ગલમઙ્ગલાય ।
માર્તણ્ડમણ્ડલચર્યૈ । મહાલક્ષ્મ્યૈ । મદોજ્ઝિતાયૈ ।
યશસ્વિન્યૈ । યશોદાયૈ । યોગ્યાયૈ । યુક્તાત્મસેવિતાયૈ ।
યોગસિદ્ધિપ્રદાયૈ નમઃ । ૮૨૦

ૐ યાજ્યાયૈ નમઃ । યજ્ઞેશપરિપૂરિતાયૈ । યજ્ઞેશ્યૈ ।

યજ્ઞફલદાયૈ । યજનીયાયૈ । યશસ્કર્યૈ । યમિસેવ્યાયૈ ।
યોગયોનયે । યોગિન્યૈ । યુક્તબુદ્ધિદાયૈ । યોગજ્ઞાનપ્રદાયૈ ।
યુક્તાયૈ । યમાદ્યષ્ટાઙ્ગયોગયુક્ । યન્ત્રિતાઘૌઘસઞ્ચારાયૈ ।
યમલોકનિવારિણ્યૈ । યાતાયાતપ્રશમન્યૈ । યાતનાનામકૃન્તન્યૈ ।
યામિનીશહિમાચ્છોદાયૈ । યુગધર્મવિવર્જિતાયૈ । રેવત્યૈ નમઃ । ૮૪૦

ૐ રતિકૃતે નમઃ । રમ્યાયૈ । રત્નગર્ભાયૈ । રમાયૈ ।
રતયે । રત્નાકરપ્રેમપાત્રાય । રસજ્ઞાયૈ । રસરૂપિણ્યૈ ।
રત્નપ્રાસાદગર્ભાયૈ । રમણીયતરઙ્ગિણ્યૈ । રત્નાર્ચિષે ।
રુદ્રરમણ્યૈ । રાગદ્વેષવિનાશિન્યૈ । રમાયૈ । રામાયૈ ।
રમ્યરૂપાયૈ । રોગિજીવાનુરૂપિણ્યૈ । રુચિકૃતે । રોચન્યૈ ।
રમ્યાયૈ નમઃ । ૮૬૦

ૐ રુચિરાયૈ નમઃ । રોગહારિણ્યૈ । રાજહંસાયૈ । રત્નવત્યૈ ।
રાજત્કલ્લોલરાજિકાયૈ । રામણીયકરેખાયૈ । રુજારયે । રોગરોષિણ્યૈ
var રોગશોષિણ્યૈ । રાકાયૈ । રઙ્કાર્તિશમન્યૈ । રમ્યાયૈ ।
રોલમ્બરાવિણ્યૈ । રાગિણ્યૈ । રઞ્જિતશિવાયૈ । રૂપલાવણ્યશેવધયે ।
લોકપ્રસુવે । લોકવન્દ્યાયૈ । લોલત્કલ્લોલમાલિન્યૈ । લીલાવત્યૈ ।
લોકભૂમયે નમઃ । ૮૮૦

ૐ લોકલોચનચન્દ્રિકાયૈ નમઃ । લેખસ્રવન્ત્યૈ । લટભાયૈ ।
લઘુવેગાયૈ । લઘુત્વહૃતે । લાસ્યત્તરઙ્ગહસ્તાયૈ ।
લલિતાયૈ । લયભઙ્ગિગાયૈ । લોકબન્ધવે । લોકધાત્ર્યૈ ।
લોકોત્તરગુણોર્જિતાયૈ । લોકત્રયહિતાયૈ । લોકાયૈ । લક્ષ્મ્યૈ ।
લક્ષણલક્ષિતાયૈ । લીલાયૈ । લક્ષિતનિર્વાણાયૈ ।
લાવણ્યામૃતવર્ષિણ્યૈ । વૈશ્વાનર્યૈ । વાસવેડ્યાયૈ નમઃ । ૯૦૦

ૐ વન્ધ્યત્વપરિહારિણ્યૈ નમઃ । વાસુદેવાઙ્ઘ્રિરેણુઘ્ન્યૈ ।
વજ્રિવજ્રનિવારિણ્યૈ । શુભાવત્યૈ । શુભફલાયૈ ।
શાન્ત્યૈ । શન્તનુવલ્લભાયૈ । શૂલિન્યૈ । શૈશવવયસે ।
શીતલામૃતવાહિન્યૈ । શોભાવત્યૈ । શીલવત્યૈ ।
શોષિતાશેષકિલ્બિષાયૈ । શરણ્યાયૈ । શિવદાયૈ । શિષ્ટાયૈ ।
શરજન્મપ્રસુવે । શિવાયૈ । શક્તયે । શશાઙ્કવિમલાયૈ નમઃ । ૯૨૦

ૐ શમનસ્વસૃસમ્મતાયૈ નમઃ । શમાયૈ । શમનમાર્ગઘ્ન્યૈ ।

શિતિકણ્ઠમહાપ્રિયાયૈ । શુચયે । શુચિકર્યૈ । શેષાયૈ ।
શેષશાયિપદોદ્ભવાયૈ । શ્રીનિવાસશ્રુત્યૈ । શ્રદ્ધાયૈ ।
શ્રીમત્યૈ । શ્રિયૈ । શુભવ્રતાયૈ । શુદ્ધવિદ્યાયૈ ।
શુભાવર્તાયૈ । શ્રુતાનન્દાયૈ । શ્રુતિસ્તુતયે । શિવેતરઘ્ન્યૈ ।
શબર્યૈ । શામ્બરીરૂપધારિણ્યૈ નમઃ । ૯૪૦

ૐ શ્મશાનશોધન્યૈ નમઃ । શાન્તાયૈ । શશ્વતે ।
શતધૃતિ(શશ્વચ્છતધૃતિ)સ્તુતાયૈ । શાલિન્યૈ ।
શાલિશોભાઢ્યાયૈ । શિખિવાહનગર્ભભૃતે ।
શંસનીયચરિત્રાયૈ । શાતિતાશેષપાતકાયૈ ।
ષડ્ગુણૈશ્વર્યસમ્પન્નાયૈ । ષડઙ્ગશ્રુતિરૂપિણ્યૈ ।
ષણ્ઢતાહારિસલિલાયૈ । સ્ત્યાયન્નદનદીશતાયૈ । સરિદ્વરાયૈ ।
સુરસાયૈ । સુપ્રભાયૈ । સુરદીર્ઘિકાયૈ । સ્વઃ સિન્ધવે ।
સર્વદુઃખઘ્ન્યૈ । સર્વવ્યાધિમહૌષધાય નમઃ । ૯૬૦

ૐ સેવ્યાયૈ નમઃ । સિદ્ધ્યૈ । સત્યૈ । સૂક્તયે ।
સ્કન્દસુવે । સરસ્વત્યૈ । સમ્પત્તરઙ્ગિણ્યૈ । સ્તુત્યાયૈ ।
સ્થાણુમૌલિકૃતાલયાયૈ । સ્થૈર્યદાયૈ । સુભગાયૈ ।
સૌખ્યાયૈ । સ્ત્રીષુ સૌભાગ્યદાયિન્યૈ । સ્વર્ગનિઃશ્રેણિકાયૈ ।
સૂક્ષ્માયૈ var સૂમાયૈ । સ્વધાયૈ । સ્વાહાયૈ । સુધાજલાય ।
સમુદ્રરૂપિણ્યૈ । સ્વર્ગ્યાયૈ નમઃ । ૯૮૦

ૐ સર્વપાતકવૈરિણ્યૈ નમઃ । સ્મૃતાઘહારિણ્યૈ । સીતાયૈ ।
સંસારાબ્ધિતરણ્ડિકાયૈ । સૌભાગ્યસુન્દર્યૈ । સન્ધ્યાયૈ ।
સર્વસારસમન્વિતાયૈ । હરપ્રિયાયૈ । હૃષીકેશ્યૈ ।
હંસરૂપાયૈ । હિરણ્મય્યૈ । હૃતાઘસઙ્ઘાયૈ । હિતકૃતે ।
હેલાયૈ । હેલાઘગર્વહૃતે । ક્ષેમદાયૈ । ક્ષાલિતાઘૌઘાયૈ ।
ક્ષુદ્રવિદ્રાવિણ્યૈ । ક્ષમાયૈ । ગઙ્ગાયૈ નમઃ । ૧૦૦૦

NA

*Gangasahasranamavali*

pdf was typeset on January 22, 2022

Please send corrections to *sanskrit@cheerful.com*